# Katharudra Upanishad

# કઠરુદ્રોપનિષત્

## Document Information

Text title : Katharudra Upanishad

File name : katharudra.itx

Category : upanishhat, shiva

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 83 / 108; Krishna Yajurveda - Sanyasa upanishad

Latest update : August 14, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# કઠરુદ્રોપનિષત્

પરિવ્રજ્યાધર્મપૂગાલંકારા યત્પદં યયુઃ ।
તદહં કઠવિદ્યાર્થં રામચન્દ્રપદં ભજે ॥

ૐ સહનાવવતુ સહ નૌ ભુનક્તુ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ દેવા હ વૈ ભગવન્તમબ્રુવન્નધીહિ ભગવન્બ્રહ્મવિદ્યામ્ ।
સ પ્રજાપતિરબ્રવીત્સશિખાન્કેશાન્નિષ્કૃત્ય વિસૃજ્ય યજ્ઞોપવીતં
નિષ્કૃત્ય પુત્રં દૃષ્ટ્વા ત્વં બ્રહ્મા ત્વં યજ્ઞસ્ત્વં વષટ્કાર-
સ્ત્વમોઙ્કારસ્ત્વં સ્વાહા ત્વં સ્વધા ત્વં ધાતા ત્વં વિધાતા ત્વં
પ્રતિષ્ઠાઽસીતિ વદેત્ । અથ પુત્રો વદત્યહં બ્રહ્માહં યજ્ઞોઽહં
વષટ્કારોઽહમોંકારોઽહં સ્વાહાહં સ્વધાહં ધાતાહં
વિધાતાહં ત્વષ્ટાહં પ્રતિષ્ઠાસ્મીતિ ।
તાન્યેતાન્યનુવ્રજન્નાશ્રુમાપાતયેત્ ।
યદશ્રુમાપાતયેત્પ્રજાં વિચ્છિન્દ્યાત્ ।
પ્રદક્ષિણમાવૃત્ત્યૈતચ્ચૈતચ્ચાનવેક્ષમાણાઃ પ્રત્યાયન્તિ ।
સ સ્વર્ગ્યો ભવતિ બ્રહ્મચારી વેદમધીત્ય વેદોક્તાચરિતબ્રહ્મચર્યો
દારાનાહૃત્ય પુત્રાનુત્પાદ્ય તાનનુપાદિભિર્વિતત્યેષ્ટ્વા ચ
શક્તિતો યજ્ઞૈઃ । તસ્ય સંન્યાસો ગુરુભિરનુજ્ઞાતસ્ય બાન્ધવૈશ્ચ ।
સોઽરણ્યં પરેત્ય દ્વાદશરાત્રં પયસાગ્નિહોત્રં જુહુયાત્ ।
દ્વાદશરાત્રં પયોભક્ષા સ્યાત્ । દ્વાદશરાત્રસ્યાન્તે
અગ્નયે વૈશ્વાનરાય પ્રજાપતયે ચ પ્રાજાપત્યં ચરું
વૈષ્ણવં ત્રિકપાલમગ્નિં સંસ્થિતાનિ પૂર્વાણિ દારુપાત્રાણ્યગ્નૌ
જુહુયાત્ । મૃણ્મયાન્યપ્સુ જુહુયાત્ । તૈજસાનિ ગુરવે દદ્યાત્ ।
મા ત્વં મામપહાય પરાગાઃ । નાહં ત્વામપહાય પરાગામિતિ ।

ગાર્હપત્યદક્ષિણાગ્ન્યાહવનીયેષ્વરણિદેશાદ્ભસ્મમુષ્ટિં
પિબેદિત્યેકે । સશિખાન્કેશાન્નિષ્કૃત્ય વિસૃજ્ય યજ્ઞોપવીતં
ભૂઃસ્વાહેત્યપ્સુ જુહુયાત્ । અત ઊર્ધ્વમનશનમપાં પ્રવેશ-
મગ્નિપ્રવેશં વીરાધ્વાનં મહાપ્રસ્થાનં વૃદ્ધાશ્રમં વા
ગચ્છેત્ । પયસા યં પ્રાશ્નીયાત્સોઽસ્ય સાયંહોમઃ । યત્પ્રાતઃ
સોઽયં પ્રાતઃ । યદ્દર્શે તદ્દર્શનમ્ । યત્પૌર્ણમાસ્યે  તત્પૌર્ણમાસ્યમ્ ।
યદ્વસન્તે કેશશ્મશ્રુલોમનખાનિ વાપયેત્સોઽસ્યાગ્નિષ્ટોમઃ ।
સંન્યસ્યાગ્નિં ન પુનરાવર્તયેન્મૃત્યુર્જયમાવહમિત્યધ્યાત્મ-
મન્ત્રાન્પઠેત્ । સ્વસ્તિ સર્વજીવેભ્ય ઇત્યુક્ત્વાત્માનમનન્યં ધ્યાયન્ તદૂર્ધ્વબાહુર્વિમુક્તમાર્ગો ભવેત્ ।
અનિકેતશ્ચરેત્ । ભિક્ષાશી યત્કિંચિન્નાદ્યાત્ । લવૈકં ન ધાવયેજ્જન્તુસંરક્ષણાર્થં વર્ષવર્જમિતિ । તદપિ શ્લોકા ભવન્તિ
।

કુણ્ડિકાં ચમસં શિક્યં ત્રિવિષ્ટમુપાનહૌ ।
શીતોપઘાતિનીં કન્થાં કૌપીનાચ્છાદનં તથા ॥ ૧॥

પવિત્રં સ્નાનશાટીં ચ ઉત્તરાસઙ્ગમેવ ચ ।
યજ્ઞોપવીતં વેદાંશ્ચ સર્વં તદ્વર્જયેદ્યતિઃ ॥ ૨॥

સ્નાનં પાનં તથા શૌચમદ્ભિઃ પૂતાભિરાચરેત્ ।
નદીપુલિનશાયી સ્યાદ્દેવાગારેષુ વા સ્વપેત્ ॥ ૩॥

નાત્યર્થં સુખદુઃખાભ્યાં શરીરમુપતાપયેત્ ।
સ્તૂયમાનો ન તુષ્યેત નિન્દિતો ન શપેત્પરાન્ ॥ ૪॥

બ્રહ્મચર્યેણ સંતિષ્ઠેદપ્રમાદેન મસ્કરી ।
દર્શનં સ્પર્શનં કેલિઃ કીર્તનં ગુહ્યભાષણમ્ ॥ ૫॥

સંકલ્પોઽધ્યવસાયશ્ચ ક્રિયાનિર્વૃત્તિરેવ ચ ।
એતન્મૈથુનમષ્ટાઙ્ગં પ્રવદન્તિ મનીષિણઃ ॥ ૬॥

વિપરીતં બ્રહ્મચર્યમનુષ્ઠેયં મુમુક્ષુભિઃ ।
યજ્જગદ્ભાસકં ભાનં નિત્યં ભાતિ સ્વતઃ સ્ફુરત્ ॥ ૭॥

સ એવ જગતઃ સાક્ષી સર્વાત્મા વિમલાકૃતિઃ ।
પ્રતિષ્ઠા સર્વભૂતાનાં પ્રજ્ઞાનઘનલક્ષણઃ ॥ ૮॥

ન કર્મણા ન પ્રજયા ન ચાન્યેનાપિ કેચિત્ ।
બ્રહ્મવેદનમાત્રેણ બ્રહ્માપ્નોત્યેવ માનવઃ ॥ ૯॥

તદ્વિધા વિષયં બ્રહ્મ સત્યજ્ઞાનસુખાદ્વયમ્ ।
સંસારે ચ ગુહાવાચ્યે માયાજ્ઞાનાદિસંજ્ઞકે ॥ ૧૦॥

નિહિતં બ્રહ્મ યો વેદ પરમે વ્યોમ્નિ સંજ્ઞિતે ।
સોઽશ્નુતે સકલાન્કામાન્ક્રમેણૈવ દ્વિજોત્તમઃ ॥ ૧૧॥

પ્રત્યગાત્માનમજ્ઞાનમાયાશક્તેશ્ચ સાક્ષિણમ્ ।
એકં બ્રહ્માહમસ્મીતિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૨॥

બ્રહ્મભૂતાત્મનસ્તસ્માદેતસ્માચ્છક્તિમિશ્રિતાત્ ।
અપઞ્ચીકૃત આકાશસંભૂતો રજ્જુસર્પવત્ ॥ ૧૩॥

આકાશાદ્વાયુસંજ્ઞસ્તુ સ્પર્શોઽપઞ્ચીકૃતઃ પુનઃ ।
વાયોરગ્નિસ્તથા ચાગ્નેરાપ અદ્ભ્યો વસુન્ધરા ॥ ૧૪॥

તાનિ ભૂતાનિ સૂક્ષ્માણિ પઞ્ચીકૃત્યેશ્વરસ્તદા ।
તેભ્ય એવ વિસૃષ્ટં તદ્બ્રહ્માણ્ડાદિ શિવેન હ ॥ ૧૫॥

બ્રહ્માણ્ડસ્યોદરે દેવા દાનવા યક્ષકિન્નરાઃ ।
મનુષ્યાઃ પશુપક્ષ્યાદ્યાસ્તત્તત્કર્માનુસારતઃ ॥ ૧૬॥

અસ્થિસ્નાય્વાદિરૂપોઽયં શરીરં ભાતિ દેહિનામ્ ।
યોઽયમન્નમયો હ્યાત્મા ભાતિ સર્વશરીરિણઃ ॥ ૧૭॥

તતઃ પ્રાણમયો હ્યાત્મા વિભિન્નશ્ચાન્તરઃ સ્થિતઃ ।
તતો વિજ્ઞાન આત્મા તુ તતોઽન્યશ્ચાન્તરઃ સ્વતઃ ॥ ૧૮॥

આનન્દમય આત્મા તુ તતોઽન્યશ્ચાન્તરસ્થિતઃ ।
યોઽયમન્નમયઃ સોઽયં પૂર્ણઃ પ્રાણમયેન તુ ॥ ૧૯॥

મનોમયેન પ્રાણોઽપિ તથા પૂર્ણઃ સ્વભાવતઃ ।
તથા મનોમયો હ્યાત્મા પૂર્ણો જ્ઞાનમયેન તુ ॥ ૨૦॥

આનન્દેન સદા પૂર્ણઃ સદા જ્ઞાનમયઃ સુખમ્ ।
તથાનન્દમયશ્ચાપિ બ્રહ્મણોઽન્યેન સાક્ષિણા ॥ ૨૧॥

સર્વાન્તરેણ પૂર્ણશ્ચ બ્રહ્મ નાન્યેન કેનચિત્ ।
યદિદં બ્રહ્મપુચ્છાખ્યં સત્યજ્ઞાનદ્વયાત્મકમ્ ॥ ૨૨॥

સારમેવ રસં લબ્ધ્વા સાક્ષાદ્દેહી સનાતનમ્ ।
સુખી ભવતિ સર્વત્ર અન્યથા સુખતા કુતઃ ॥ ૨૩॥

અસત્યસ્મિન્પરાનન્દે સ્વાત્મભૂતેઽખિલાત્મનામ્ ।
કો જીવતિ નરો જન્તુઃ કો વા નિત્યં વિચેષ્ટતે ॥ ૨૪॥

તસ્માત્સર્વાત્મના ચિત્તે ભાસમાનો હ્યસૌ નરઃ ।
આનન્દયતિ દુઃખાઢ્યં જીવાત્માનં સદા જનઃ ॥ ૨૫॥

યદા હ્યેવૈષ એતસ્મિન્નદૃશ્યત્વાદિલક્ષણે ।
નિર્ભેદં પરમાદ્વૈતં વિન્દતે ચ મહાયતિઃ ॥ ૨૬॥

તદેવાભયમત્યન્તકલ્યાણં પરમામૃતમ્ ।
સદ્રૂપં પરમં બ્રહ્મ ત્રિપરિચ્છેદવર્જિતમ્ ॥ ૨૭॥

યદા હ્યેવૈષ એતસ્મિન્નલ્પમપ્યન્તરં નરઃ ।
વિજાનાતિ તદા તસ્ય ભયં સ્યાન્નાત્ર સંશયઃ ॥ ૨૮॥

અસ્યૈવાનન્દકોશેન સ્તમ્બાન્તા વિષ્ણુપૂર્વકાઃ ।
ભવન્તિ સુખિનો નિત્યં તારતમ્યક્રમેણ તુ ॥ ૨૯॥

તત્તત્પદવિરક્તસ્ય શ્રોત્રિયસ્ય પ્રસાદિનઃ ।
સ્વરૂપભૂત આનન્દઃ સ્વયં ભાતિ પરે યથા ॥ ૩૦॥

નિમિત્તં કિંચિદાશ્રિત્ય ખલુ શબ્દઃ પ્રવર્તતે ।
યતો વાચો નિવર્તન્તે નિમિત્તાનામભવતઃ ॥ ૩૧॥

નિર્વિશેષે પરાનન્દે કથં શબ્દઃ પ્રવર્તતે ।
તસ્માદેતન્મનઃ સૂક્ષ્મં વ્યાવૃતં સર્વગોચરમ્ ॥ ૩૨॥

યસ્માચ્છ્રોત્રત્વગક્ષ્યાદિખાદિકર્મેન્દ્રિયાણિ ચ ।
વ્યાવૃત્તાનિ પરં પ્રાપ્તું ન સમર્થાનિ તાનિ તુ ॥ ૩૩॥

તદ્બ્રહ્માનન્દમદ્વન્દ્વં નિર્ગુણં સત્યચિદ્ઘનમ્ ।
વિદિત્વા સ્વાત્મરૂપેણ ન બિભેતિ કુતશ્ચન ॥ ૩૪॥

એવં યસ્તુ વિજાનાતિ સ્વગુરોરુપદેશતઃ ।
સ સાધ્વાસાધુકર્મભ્યાં સદા ન તપતિ પ્રભુઃ ॥ ૩૫॥

તાપ્યતાપકરૂપેણ વિભાતમખિલં જગત્ ।
પ્રત્યગાત્મતયા ભાતિ જ્ઞાનાદ્વેદાન્તવાક્યજાત્ ॥ ૩૬॥

શુદ્ધમીશ્વરચૈતન્યં જીવચૈતન્યમેવ ચ ।

પ્રમાતા ચ પ્રમાણં ચ પ્રમેયં ચ ફલં તથા ॥ ૩૭॥

ઇતિ સપ્તવિધં પ્રોક્તં ભિદ્યતે વ્યવહારતઃ ।
માયોપાધિવિનિર્મુક્તં શુદ્ધમિત્યભિધીયતે ॥ ૩૮॥

માયાસંબન્ધતશ્ચેશો જીવોઽવિદ્યાવશસ્તથા ।
અન્તઃકરણસંબન્ધાત્પ્રમાતેત્યભિધીયતે ॥ ૩૯॥

તથા તદ્વૃત્તિસંબન્ધાત્પ્રમાણમિતિ કથ્યતે ।
અજ્ઞાતમપિ ચૈતન્યં પ્રમેયમિતિ કથ્યતે ॥ ૪૦॥

તથા જ્ઞાતં ચ ચૈતન્યં ફલમિત્યભિધીયતે ।
સર્વોપાધિવિનિર્મુક્તં સ્વાત્માનં ભાવયેત્સુધીઃ ॥ ૪૧॥

એવં યો વેદ તત્ત્વેન બ્રહ્મભૂયાય કલ્પતે ।
સર્વવેદાન્તસિદ્ધાન્તસારં વચ્મિ યથાર્થતઃ ॥ ૪૨॥

સ્વયં મૃત્વા સ્વયં ભૂત્વા સ્વયમેવાવશિષ્યતે ॥ ઇત્યુપનિષત્ ॥

ૐ સહનાવવતુ સહ નૌ ભુનક્તુ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ કઠરુદ્રોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Katharudra Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*